# संस्कृत-वार्ता:

**दिनाङ्क :-13.06.2024**

**प्रात: - 06:55**

**प्रधानमंत्री-इटलीयात्रा**

प्रधानमंत्री नरेंद्रमोदी जी-सप्त शिखरसम्मेलने सम्मिलितुं अद्य इटलीं प्रति यास्यति । विदेश-सचिवः विनय-क्वात्रा नवदिल्ल्यां प्रावोचत् यत् शुक्रवासरे जायमाने सम्मेलने भारतं विकासोन्मुख-देशस्य रूपेण आमंत्रितम् अस्ति । सः प्रोक्तवान यत् इयं यात्रा भारताय वैश्विक-दक्षिणक्षेत्राय च महत्वपूर्णविषयेषु वैश्विक-नेतृभिः सह सुदृढ-सम्बन्ध-निर्माणस्य अवसरं प्रदास्यति । प्रधानमंत्री अस्मिन् सत्रे सम्मिलितो भविष्यति। सम्मेलनम् अतिरिच्य, श्रीमोदिनः जी-सप्त-देशानां नेतृभिः सह द्विपक्षीयोपवेशनं अपि सम्भाव्यते। श्रीमोदी इटली-देशस्य प्रधानमंत्रिणा जियोर्जिया-मेलोनी इत्यनया सह उपवेशनं करिष्यति। विदेश-सचिवः प्रावोचत् यत् भारतं स्विट्जरलैंड-देशे आयोक्ष्यमाणे यूक्रेन-शांति-शिखर-सम्मेलनोचित-स्तरे सम्मिलितं भविष्यति। अस्मिन् मासे स्विट्जरलैंडे आयोक्ष्यमाणे सम्मेलने न्यूनातिन्यूनः नवति देशाः सम्मिलिताः भविष्यन्ति ।

**अरूणाचल-मुख्यमन्त्रीशपथः**

भारतीय-जनता-पार्टितिदलनेता पेमाखाण्डूः अद्य अरूणाचलप्रदेशस्य मुख्यमन्त्रिपदत्वेन शपथवचनं स्वीकरिष्यति। इदं शपथग्रहणसम्मेलनं प्रातः एकादशवादने ईटानगरस्य दोरजी-खाण्डू-सम्मेलनकेन्द्रे आयोजयिष्यते। श्रीखाण्डूः ह्यः सायं राज्यस्य राजभवने राज्यपालेन लेफ्टिनेंट-जनरल-कैवल्य-त्रिविक्रम-परनाइकेन सह मेलनं कृतवान्। तदनु राज्यपालेन नवीनसर्वकारस्य निर्माणाय असौ आमन्त्रितः। इतः पूर्वं श्रीखाण्डूः केन्द्रीय-प्रेक्षकयोः रविशंकर-प्रसाद-तरूणचुघ-इत्यनयोः उपस्थितौ सर्वसम्मत्या अरूणाचलप्रदेशस्य भाजपा-विधायक-दलस्य नेता चितः जातः। अस्मिन् शपथग्रहण-समारोहे केन्द्रीयगृहमन्त्री अमितशाहः भाजपेतिदलाध्यक्षः जे.पी. नड्डाः दलस्य महासचिवः बी.एल. सन्तोषः च सम्मिलिताः भविष्यन्ति।

**जयशंकरः- कुवैत**

प्रधानमन्त्री-नरेन्द्रमोदी विदेश-मंत्री सुब्रह्मण्यम-जयशंकरः च कुवैत-नगरे दुरापन्ने भीषणे अग्निकाण्डे महद्-दुःखं व्यक्तमकुरुताम्। अस्यां दुर्घटनायां चत्वांरिशदधिकजनाः काल कवलिताः भूताः सहैव पञ्चाशदधिकजनाः व्रणिताः सन्ति। श्रीजयशंकरः आश्वासनं प्रदत्तवान् यत् कुवैते भारतीय-दूतावासः प्रभावितेभ्यः सर्वेभ्यः जनेभ्यः साहाय्यं प्रदास्यति।

**ऋतु-विज्ञान**

अग्रिमेषु चतुर्षु दिवसेषु उत्तरप्रदेश-गांगीयपश्चिमबंगाल-बिहार-झारखण्ड-राज्यानां केषुचित् भागेषु अत्युष्णलहर्याः सम्भावना वर्तते। भारतर्तु-विज्ञान-विभागेन उत्तराखण्ड-पंजाब-हरियाणा-राजस्थान-हिमाचलप्रदेश-जम्मूसम्भाग-ओडिशा-राज्येषु उष्णलहर्याः प्रवाहः अनुमानितः।

विभागेन संसूचितं यत् अग्रिमेषु त्रिषु दिवसेषु पूर्वीयभारते वरिवर्धमाने तापमाने अपचितेः काऽपि सम्भावना नैव वर्तते। अपरत्र प्रावृट्-प्रभावः अद्य महाराष्ट्रस्य केषुचित् भागेषु सम्पूर्ण-तेलंगानायां छत्तीसगढ़स्य क्षेत्रेषु वर्धितो जातः। उपहिमाचलयीय-पश्चिम् बंगाल-सिक्किम-पूर्वोत्तरीय भारते च अतिवृष्टिः सम्भाव्यते इति।

## विंशति-क्रिकेटप्रतिस्पर्धा

आई.सी.सी इत्यस्यां पुरूषाणां विंशतिप्रतिविंशति-विश्व-चषक-क्रिकेट-प्रतिस्पर्धायां ह्यः रात्रौ न्यूयॉर्कनगरस्य नासाउ-काउंटी-अन्ताराष्ट्रिय-क्रिकेट-क्रीडाङ्गणे भारतेन अमरिकादलं सप्तस्तोभैः पराजितम्। अद्य प्रतिस्पर्धाद्वयं भविष्यति। वेस्टइण्डीजदलं अद्य प्रातः त्रिनिदादनगरे ब्रायन-लारा-क्रीडांगणे न्यूजीलैण्डदलं सम्मुखी करिष्यति। अपरत्र, वेस्टइण्डीजदेशस्य किंग्सटाउन इत्यत्र अर्नोस-वाले क्रीडांगणे बांग्लादेशेन सह नीदरलैण्ड्सदलस्य सामुख्यं भविष्यति।